सहायक ...
सुकेश्वर सिंह

कक्षा — B. A. Part — I (HONOURS)

Paper — I

व्याख्या

प्रश्न: 1. पद्यमिदं व्याख्येयम —

व्रजन्ति ते मूढधियः पराभवं
भवन्ति मायाविषु ये न मायिनः
प्रविश्य हि घ्नन्ति शठास्तथाविधा-
नसंवृताङ्गान्निशिता इवेषवः ॥

उत्तरम् — महाकवि भारवि प्रणीतस्य किरातार्जुनीय महाकाव्यस्य प्रथम सर्गात् उद्धृते ऽस्मिन् पद्ये द्रौपदी युधिष्ठिरं प्रतिकथयति यत् ये मायाविषु कपटाचरणं न कुर्वन्ति ते पराजिताः भवन्ति, अर्थात शठे शाठ्यं समाचरेत् इति प्रतिपादितम्। ये जनाः कपटिषु कपटं न कुर्वन्ति ते मन्द बुद्धयः पराजयं प्राप्नुवन्ति। यथा तीक्ष्णाः बाणाः कवचादिभिः अरक्षितशरीरान् अन्तः प्रविश्य तान् विनाशयन्ति तथैव कपटयुक्ताः जनाः सज्जमानाँ मनसि विश्वासमुपाद्य आत्मीयाः भूत्वा तान सज्जनान विनाशयन्ति।

यतोहि आर्जवं कुटिलेषु न नीतिः "कुटिलेष्व कौटिल्यं नोचितम्" अतः कपटिना दुर्योधनेन सह कपटपूर्ण व्यवहार एव करणीयः इति द्रौपद्याः प्रभिप्रायः।

विशेष: — (1) उपमा, काव्यलिङ्गमलङ्कारश्च।

(2) वंशस्थच्छन्दः।